Sans. MS.
181.4
T187
134-Ms

तर्कसंग्रह ॥ चन्द्रराज सिंहस्य प्रि ब्येण त्रिभुवनहरणदत्त सिंहेण कृत ॥

२० पत्रक ॥ ल० अ० ११ पं० प्र० पृ०

ह० लि०

134

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

ॐ ॐ श्रीगणेशायनमः श्रीगुरुचरणकमलेभ्योनमः कश्चिदिति कश्चिद्यक्षः रामगिर्य्याश्रमेषुवसतिंचक्रे कृतवान्
मे॰टी॰ रामेणदाशरथिनाऽधिष्ठितोगिरिः रामगिरिः रामगिरेराश्रमः रामगिर्य्याश्रमास्तेषुरामः कथंभूतोयक्षः भर्तुः शा
१ पेनस्तंगमितमहिमाऽस्तंगमितःप्राप्तः महिमायस्यसः कथंभूतेनशापेन कांतायाः विरहः कांताविरहः कांता
विरहेणगुरुस्तेनपुनः कथंभूतेनशापेनवर्षभोग्येनवर्षंसंवत्सरंभोग्यः तेनकालात्ययनोरितिद्वितीया पुनःकथं

ॐ कश्चित्कान्ताविरहगुरुणास्वाधिकारप्रमत्तः शापेनास्तंग
मितमहिमावर्षभोग्येनभर्तुः यक्षश्चक्रेजनकतनयास्नान
पुण्योदकेषु स्निग्धच्छायातरुषुवसतिंरामगिर्य्याश्रमेषु १

भूतः यक्षः स्वाधिकारात्प्रमत्तः स्वस्याधिकारः स्वाधिकारः स्वाधिकारात्प्रमत्तः स्वकार्य्येष्वसावधानः कथं
भूतेषुरामगिर्य्याश्रमेषुजनकतनयास्नानपुण्योदकेषु जनकस्यराज्ञस्तनयासीताजनकतनयातस्याःस्ना
नेतेनपुण्यानिउदकानियेषुतानितेषुजनकतनयास्नानपुण्योदकेषुपुनःकीदृशेषुराम १
स्निग्धच्छायातरुषुस्निग्धाच्छायातरवोयेषुतेषु १ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

मे० टी० ३

सन्तप्तानामिति हे पयोद मेघ यतस्तस्मात्कारणात् त्वं संतप्तानां पीडितानां शरणमसि रक्षकोसि तस्मात्कारणात् मे मम संदेशं प्रि
यायाः हर नयस्व कथंभूतस्य मम धनपतिक्रोधविश्लेषितस्य धनपतेः क्रोधः तेन विश्लेषितः वियोजितस्तस्य तेन त्वया अलकानाम पुरी गं
तव्या कथंभूता अलका यक्षेश्वराणां वसतिर्वासस्थानं पुनः कथंभूता अलका बाह्योद्यानस्थितः हरशिरश्चंद्रिकाधौतहर्म्याणि
गृहाणि यस्यां सा तथा इति कृत्यानां कर्तरि चेति षष्ठी ७ त्वामारूढमिति हे मेघ पथिकवनिताः त्वां प्रेक्षिष्यंते विलोकयिष्यंति पथि

संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः संदेशं मे हर धनपतिक्रोधविश्लेषितस्य गंतव्या ते वसतिरलकानाम य
क्षेश्वराणां बाह्योद्यानस्थितहरशिरश्चंद्रिकाधौतहर्म्या ७ त्वामारूढं पवनपदवीमुद्गृहीतालकांताः प्रेक्षिष्यं
पथिकवनिताः प्रत्ययादाश्वसंत्यः कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां न स्यादन्योप्यहमिव जनो यः परा
धीनवृत्तिः ८ ॥

कानामध्वगानां परदेशिनां वा वनिताः पथिकवनिताः कथंभूतं त्वां पवनपदवीमारूढं पवनस्य पद
वीं गमनं तां कथंभूताः पथिकवनिताः उद्गृहीतालकांताः उद्गृहीताः उपरि धृताः अलकांता केशांता याभिस्ताः पुनः
कीदृशाः पथिकवनिताः प्रत्ययात् आश्वसंत्यः स्वस्थीभवंत्यः मेघं दृष्ट्वा भर्तारः समेष्यंतीति विश्वासः प्रत्ययः त्वयि सन्नद्धे समाग
ते सति कः पुमान् जायां भार्यां उपेक्षेत न गणयेत् कथंभूतां भार्यां विरहविधुरां विरहेण वियोगेन विधुरां विह्वलां तापः जनः अ
हमिव पराधीनवृत्तिः यः अन्योपि जनः न स्यात् मा भवेत् पराधीना वृत्तिर्वर्तनं यस्य स पराधीनवृत्तिः एतादृग्भाग्यवानहमेव ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

धूमेति मेघः क्वसंदेशार्थाः क्वकीदृशाः मेघः धूमज्योतिःसलिलमरुतांसन्निपातःधूमश्चज्योतिश्चसलिलंचमरुद्वायुश्चतेतेषां
सन्निपातोमेलनंकथंभूताःसंदेशार्थाःप्राणिभिःप्रापणीयाःनेतव्याःकथंभूतैःप्राणिभिःपटुकरणैःपटूनिस्पष्टानिकरणा
नि इंद्रियाणियेषांतेतैः इतिएततऔत्सुक्यात् उत्कंठात्अपरिगणयन्अविचारयन्गुह्यकःयक्षः तंमेघंययाचेप्रार्थितवान्
हियस्मात्कामार्ताःपुरुषाः चेतनाचेतनेषुजंगमस्थावरेषुप्रकृतिकृपणाःप्रकृत्यास्वभावेनैवकृपणाविनिताभवं
तियथारामादयः चेतनाचेतनेषुयाच्ञांचक्रुः स्तुतिपूर्वकंप्रार्थनंकरोति जातमितिहेमेघ अहंत्वांजानामि कथंभू

धूमज्योतिःसलिलमरुतांसन्निपातःक्वमेघः संदेशार्थाःक्वपटुकरणैःप्राणिभिःप्रापणीयाः इत्यौत्सुक्यादप
रिगणयन्गुह्यकस्तंययाचे कामार्ताहिप्रकृतिकृपणाश्चेतनाचेतनेषु ५ जातंवंशेभुवनविदितेपुष्करावर्तकानां
जानामित्वांप्रकृतिपुरुषंकामरूपंमघोनः तेनार्थित्वंत्वयिविधिवशाद्दूरबंधुर्गतोऽहं याच्ञामोघावरमधिगुणेना
धमेलब्धकामा ६ ॥

तत्वांपुष्करावर्तिकानांवंशेजातंपुष्करावर्तिकाः कल्पांतमेघाः कथंभूतेवंशेभुवनविदितेभुवने
षुत्रिभुवनेषुविदितःप्रसिद्धस्तस्मिन् पुनःकथंभूतंत्वांमघोनःइंद्रस्यप्रकृतिपुरुषंप्रधानपुरुषं पुनःकथंभूतंत्वां
कामरूपंस्वेच्छाचारिणंयतस्त्वंमहान्तेनकारणेनअहंत्वयिअर्थित्वंगतःप्राप्तःयाचितोभावःअर्थित्वंयाचकत्वंकथंभू
तोऽहंविधिवशात्दैवयोगात्दूरबंधुर्भार्यारूपोयस्यसः अधिगुणेगुणाधिकेमोघानिष्फलापियाच्ञावरंश्रेष्ठंअधमे
नीचेलब्धकामापिनवरंश्रेष्ठेत्यर्थः देवाहूतेवरः श्रेष्ठेत्रिषुक्लीवंमनाक्प्रियइतियादवः ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

मे॰ टी॰
४

प्रियस्यामेौसखाचप्रियसखास्तं पुनः कथंभूतं अमुं सार्वद्यैः नमस्करणीयैः रघुपतिपदैः श्रीरामचरणैः मेखलासुमध्य
मदेशेषु अंकितं चिह्नितं अस्य मेघस्य पर्वते प्रियसखित्वं कथं तत्रा अमुं कालेकाले अवतोन्स्नेहो वा यद्वा कालेकाले अ
वसरे यस्य पर्वतस्य भवतः तस्य संयोगं प्राप्य मिलितास्ते हव्यक्तिर्भवति स्नेहस्य व्यक्तिः स्नेहव्यक्तिः स्नेहप्रकटता कथं
भूतस्य पर्वतस्य उस्णं वाष्पं मुंचतः मेघपते वाष्पं मुंचतः मेघपते वाष्पं जलं कथंभूतं वाष्पं चिरविरहजं चिरं विरहः तस्माज्जा
तं विरहजं १० पदः कुशानकथनेन त्वरामनायजलं दं मोत्साहयति मंदमिति हे मेघ पवनः यथा येन प्रकारेण त्वां मंदं मंदं

मंदं मंदं नुदति पवनश्चानुकूलो यथा त्वां वामश्चायं नदति मधुरं चातकस्ते सगर्वः ॥
गर्भाधानक्षणपरिचयान्नूनमावद्धमालाः सेविष्यंते नयनसुभगं खे भवंतं वलाका ॥९॥

नुदति प्रेरयति कथंभूतः पवनः अनुकूलः इष्टदेशानुगामी च पुनः अयं चातकः ते तव वामः सुभसूचकः सन्मधुरं यस्या
तथा नदति शब्दं करोति कथंभूतः चातकः सगर्वः गर्वेण सह वर्त्तमानः सगर्वं गर्विष्ठः नूनं निश्चयेन वलाकाः खे आकाशे भवं
तं सेविष्यंते कस्मात् गर्भाधानलक्षणपरिचयात् गर्भस्य आधानं गर्भाधाने तत्क्षणं परिचयः गर्भाधानक्षणपरिचयस्त
स्मात् कथंभूताः वलाकाः आवद्धमालाः आवद्धाकृता माला पंक्तिर्याभिस्ताः कथंभूतं भवंतं नयनसुभगं मनोहरं नयनसु

[illegible] ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

पथिकमाहात्म्यसंपद्माह कर्त्तुमितिहेमेघंनभसिआकाशेभवतस्तवराजहंसाः आकैलासात्कैलासपर्यंतंसहायाः
संपत्स्यंतेभविष्यंति कथंभूताराजहंसाः तेतवतत्गर्जितंश्रुत्वामानसेकाःमानससरोवरेउत्काःउत्कंठिताः कथंभूतंगर्जितंश्रव
णसुभगंश्रवणयोःसुभगंतत्किंयद्गर्जितंमहीमुछिलींध्रातपत्रांकर्त्तुंप्रभवतिउतउद्भूतानिशिलींध्राणिछत्रकाणिउछिलींध्रा
णिआतपत्राणियस्याःसातांपुनःकथंभूताराजहंसाःविशकिशलयछेदपाथेयवंताः पथिसाधुभोज्यवस्तुपाथेयंशंबलं।

कर्त्तुंयच्चप्रभवतिमहीमुछिलींध्रातपत्रांतच्छ्रुत्वातेश्रवणसुभगंगर्जितंमानसोत्काः आकैलासाद्विशकि
शलयछेदपाथेयवंतः संपत्स्यंतेनभसिभवतोराजहंसाःसहायाः ९ आपृछस्वप्रियसखममुंतुंगमा।
लिंग्यशैलं वंद्यैःपुंसांरघुपतिपदैरंकितंमेखलासुकालेकालेभवतिभवतोयस्यसंयोगमेत्यस्नेहव्यक्तिश्चि
रविरहजंमुंचतोवाष्पमुष्णम् १० ॥

पाथेयंविद्यतेयेषांतेपाथेयवंतः विसानांकिसलयानिअग्राणितेषांछेदाःशकलानिविसकिशलयछेदाःतैः विश
किशलयछेदपाथेयवंतः विसानिमृणालानिचकिसलयानिचपत्राणिचतेषांछेदास्तैःपाथेयवंतइतिवा ९ आ
पृछस्वेति भोमेघअमुंशैलंआलिंग्यआपृछस्व कथंभूतंशैलंतुंगंउच्चैः पुनःकथंभूतंअमुंप्रियसखं १० ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

त॰सं॰ ८

अन्वयव्यतिरेकिणो लक्षणमाह अन्वयेनेति तृतीयायाः प्रयोज्यत्वमर्थः साध्यसाधनयोः साहचर्यमन्वयः तदभाव
योः साहचर्यं व्यतिरेकः तथा चान्वयप्रयोज्यव्याप्तिमद्व्यतिरेकप्रयोज्यव्याप्तिमदन्वयव्यतिरेकीत्यर्थः केवलव्यतिरे
किण्यतिव्याप्तिवारणायान्वयेनेति केवलान्वयिनि व्यभिचारवारणाय व्यतिरेकेणेति तथा चान्वयव्याप्तिं प्रदर्शि

अन्वयेन व्यतिरेकेण च व्याप्तिमद् अन्वयव्यतिरेकि यथा वह्नौ साध्ये धूमवत्त्वं यत्र धूमस्तत्राग्निरित्य
न्वयव्याप्तिः यथा महानस इति यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्तिः
अन्वयमात्रव्याप्तिकं केवलान्वयि यथा घटोऽभिधेयः प्रमेयत्वात् पटवदिति

नेव व्यतिरेकव्याप्तिश्च साध्याऽभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः तदुक्तं व्याप्यव्यापकभावो हि भावयोर्यादृ
ग्मिष्यते तयोरभावयोस्तस्माद्विपरीतः प्रतीयते अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते साध्याऽभावोऽन्यथा व्याप्यो व्यापकः साध
नात्ययः इति केवलान्वयिनो लक्षणमाह अन्वयेति अन्वयेनैव व्याप्तिर्यस्मिन् तथा प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिं नि त॰ टि॰ ८

॥

लिंगेति ज्ञायमानलिंगमनुमितिकरणमिति न वृद्धोक्तं युक्तं इयं यज्ञशाला वह्निमती अतीतधूमादित्यादौ लिंगाभावेऽप्यनुमितिदर्शनादित्यभिप्रायवान् लिंगपरामर्शमित्याचष्टे लिंगपरामर्श एवेति अनुमानमुपसंहरति तस्मादिति अनुमितिकरणत्वादित्यर्थः अयमेव तृतीयज्ञानमुच्यते तथाहि महानसादौ धूमाग्न्यो

स्वार्थानुमितिपरार्थानुमित्योर्लिंगपरामर्श एव करणं तस्माल्लिंगपरामर्शोऽनुमानं लिंगं त्रिविधं
अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति

र्व्याप्तिग्रहसमये यद्धूमज्ञानं तदादिमं पक्षे यद्धूमज्ञानं तद्द्वितीयं अत्रैव वह्निव्याप्यत्वेन यद्धूमज्ञानं तत्तृतीयं इदमेव लिंगपरामर्श इत्युच्यते अनुमानमिति व्यापारवत्कारणं करणमिति मते व्याप्तिज्ञानमेवानुमानं लिंगपरामर्शो व्यापार इत्यवसेयम् ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

त॰ सं॰ संदिग्धेति सपक्षवारणाय संदिग्धेति तत्रैवेति धूमवत्त्वे हेतावेवेत्यर्थः निश्चितेति विपक्षेतिव्याप्तिवा
रणाय साध्येतिपक्षेतिव्याप्तिवारणाय निश्चितेति अत्रेदं बोध्यं अन्वयव्यतिरेकित्वं च तद्रूपोपपन्नत्वं साध्य
१२ साधयितुं क्षमत्वे वा निकानीति चेद्ब्रूयतां पक्षत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिः अबाधितविषयत्वम्

संदिग्धसाध्यवान्पक्षः यथा धूमवत्त्वे हेतौ पर्वतः निश्चितसाध्यवान्सपक्षः यथा तत्रैव महानसः निश्चितसाध्याऽभाववान्विपक्षः यथा तत्रैव महाह्रदः

असत्प्रतिपक्षत्वं चेति अबाधितः साध्यरूपो विषयो यस्य तत्तथोक्तं तस्य भावस्तत्त्वम् एवं साध्याऽभावसाधकं
हेत्वन्तरं यस्य स सत्प्रतिपक्षः उक्तव्याख्येन नास्ति प्रतिपक्षो ऽसत्प्रतिपक्षस्तस्य भावस्तत्त्वमिति बोध्यं केवलान्वयि
नि च तद्रूपोपपन्नमेव स्वसाध्यं साधयितुं क्षमं तेन न स्वविपक्षविपर्यये एतद्व्यावृत्तिविपर्ययात् केवलव्यतिरे
कायितयाऽनस्य सपक्षविपर्यये ऽपि न तत्सत्त्वविपर्ययादिति हेतुत्रिरूप्य हेत्वाभासानाह ॥ १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

अत्रेति अभिधेयत्वसाधकानुमान इत्यर्थः। ननु ऊनत्वं तन्निषेधोऽनात्तत्र हेतुमाह सर्वेत्येति पदार्थमात्रस्येत्यर्थः
तथा च सकलपदाभिधेयत्वस्य सर्वप्रमाविषयत्वस्य चात्यन्ताभावः प्रतियोगित्वरूपकेवलान्वयित्वेन तद्वभा
वाप्रसिद्ध्या न हेतु इति व्यतिरेकव्याप्तिर्न संभवत्येवेति भावः केवलव्यतिरेकिणो लक्षणमाह व्यतिरेकेति व्य
तिरेकेणैव व्याप्तिर्यस्मिंस्तत्तथा अन्वयव्यतिरेकिण्यतिव्याप्तिवारणाय मात्रेति न चेयं तथेति इयं च पृथि

अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्य प्रमेयत्वादभिधेयत्वाच्च व्यतिरेकमात्रव्याप्ति
कं केवलव्यतिरेकि यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात् यदितरेभ्यो न भिद्यते न तद्गन्धवत् यथा ज
लं न चेयं न तथा तस्मात्तथेति अत्र यद्गन्धवत्तदितरेभ्यो भिन्नमित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्र
पक्षत्वात् ॥
वी न तथा न गन्धाभाववतीत्यर्थः तस्मात्तथेति गन्धाभाववदभावादितरभेदा
भाववतीत्यर्थः नन्वत्र किमिति नान्वयव्याप्तिरित्याशंकां परिहरति अत्रेति इतरभेदसाधकानुमान इत्यर्थः
हेतुमुपलक्षयति जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् यन्नैवं तन्नैवं यथा घटः प्रत्यक्षादिकं प्रमाकरणत्वात् यन्नैवं
यथा प्रत्यक्षाभासः विवादास्पदमाकाशमिति व्यवहर्तव्यं शब्दवत्त्वादित्यादिकमपि केवलव्यतिरेकीति द्रष्टव्यमत्र

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

त.सं.
१२

अन्वयेतिकेवलान्वयिन्यतिव्याप्तिवारणाय अन्वयेतिकेवलव्यतिरेकिवारणाय व्यतिरेकेति अत्रेति उपदर्शितानुमान
इत्यर्थः विरुद्धं लक्षयति साध्येति सद्धेतुवारणाय साध्याभावव्याप्त इति सत्प्रतिपक्षवारणाय सत्प्रतिपक्षभिन्न इत्यपि बोध्यं
कृतकत्वादिति कार्यत्वादित्यर्थः कृतकत्वमिति अनित्यत्वेन व्याप्तमिति यथा कृतकं तन्नदनित्यमिति व्याप्तिर्भवत्येव

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी यथा सर्वमनित्यं प्रमेयत्वादिति अत्र सर्वस्यापि पक्षत्वान्न दृष्टान्तो
नास्ति साध्याऽभावव्याप्तो हेतुर्विरुद्धः यथा शब्दो नित्यः कृतकत्वादिति कृतकत्वं हि नित्यत्वाऽभावेनानित्यत्वे
न व्याप्तं साध्याऽभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः यथा शब्दो नित्यः श्रावणत्वात् शब्दत्ववदिति श
ब्दोऽनित्यः कार्यत्वात् घटवदिति असिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति आश्रया
सिद्धो यथा गगनारविन्दं सुरभि

नयेतिभावः सत्प्रतिपक्षं लक्षयति ... साध्येति यस्येति यस्य हेतोः साध्याऽभावसाधकं
साध्याऽभावस्यानुमापकं हेत्वन्तरं प्रतिपक्षहेतुः स सत्प्रतिपक्ष इत्यर्थः अयमेव प्रकरणसम इत्युच्यते विरुद्ध
वारणाय हेत्वन्तरं यस्येति वस्तुदिसाध्यवारणाय साध्याऽभावेति असिद्धं विभजते असिद्ध इति आश्रयासिद्धाद्य
न्यतमत्वमसिद्धत्वम् आश्रयासिद्धत्वं च पक्षतावच्छेदकाभाववत्त्वं भवति हि अरविन्दे गगनीयत्वरूपप १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

सव्यभिचारेति उपदर्शितरूपाणां मध्ये कतिपयरूपोपपन्नत्वाद्धेतुवदाभासंते इति हेत्वाभासाः तत्त्वं चा
नुमितितत्करणान्यतरप्रतिबंधकयथार्थज्ञानविषयत्वं वा यत्स्थले वह्निरत्रास्त्वित्यनुमितिप्रतिबंध
कं यज्ज्ञानमनुमानत्ववद्ध्रदावनुमानत्वसाधकं द्रव्यत्वमित्याकारकं तद्विषयत्वस्य द्रव्यत्वरूपहेत्वाभासत्वा
ल्लक्षणसमन्वयः सद्धेतुवारणाय यथार्थेति घटादिवारणाय अनुमितितत्करणप्रतिबंधकेति व्यभिचा
रव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धवाधिताः पंचहेत्वाभासाः सव्यभिचारोऽनैकांतिकः स त्रिविधः साधा
रणासाधारणानुपसंहारिभेदात् तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकांतिकः यथा पर्वतो वह्निमान् प्रमे
यत्वादिति प्रमेयत्वादिति प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृ
त्तिरसाधारणः यथा शब्दो नित्यः शब्दत्वादिति शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यो व्यावृत्तं शब्दमात्रवृ

त्तिः अव्याप्तिवारणाय तत्तत्करणान्यतरेति तत्रेति साधारणादित्रितयमध्ये इत्यर्थः अत्र विरुद्धेति प्रसक्तिरि
ति मा स्म इत्यसपक्षवृत्तित्वस्यापि निवेशात् अत्रैवमपि स्वरूपासिद्धे दूषणं जागर्तीति भावः सर्वसपक्षवृत्तित्वस्या
पि तथात्वात् पक्षमात्रेति सर्वेभ्यः सपक्षविपक्षेभ्यो व्यावर्तनादिति व्याहृतः केवलव्यतिरेकिवारणाय तद्भिन्नत्वस्यापि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

व्यापकशरीरे प्रयत्नं तत्पदं साधनं भेदमादाय साधनस्योपाधित्ववारणाय व्यापकशरीरे प्रयत्नं तत्पदमावश्यकं
तसं देयं सोयमुपाधिस्त्रिविधः केवलसाध्यव्यापकः पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापक
१४ श्चेति तत्राद्य उपदर्शितः एवं क्रत्वन्तर्वर्तिनी हिंसाऽधर्मजनिका हिंसात्वात् वाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः
तस्य यत्राधर्मजनकत्वं तत्र निषिद्धत्वमिति साध्यव्यापकता यत्र हिंसात्वं तत्र न निषिद्धत्वमिति निषिद्धत्वमुपाधि
साध्यसामानाधिकरण्यावच्छिन्नाभावाप्रतियोगित्वं साध्यव्यापकत्वं साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साध
नाव्यापकत्वं यथा पर्वतो धूमवान् वह्निमत्त्वात् इत्यत्रार्द्रेन्धनसंयोग उपाधिः यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति
॥ साध्यव्यापकत्वं
साधनाव्यापकः क्रतौ हिंसाया निषिद्धत्वस्याभावात् न हिंस्यात्सर्वा भूतानीति सामान्यवाक्य
त्। पशुनायजेतेत्यादिविशेषवाक्यस्य बलीयस्त्वात् अतो हिंसात्वेनाधर्मजनकत्वे प्रयोजकमपि तन्निषिद्ध
त्वमेवेत्यादिकमपि द्रष्टव्यं द्वितीयो यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वमुपाधिः तस्य यत्र प्र
त्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति न केवलसाध्यव्यापकत्वं द्व्यणुके व्यभिचारात् किन्तु द्रव्यत्वलक्षणो यः पक्षधर्मस्तदव
च्छिन्नं वह्निः प्रत्यक्षत्वं यत्र तत्रोद्भूतरूपवत्त्वमिति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमेव आत्मनि व्यभिचारवार
णाय वह्निपदं यत्र प्रत्यक्षस्पर्शाश्रयत्वं तत्र नोद् १४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

अरविंदरूपपदे गगनीयत्वविरहात् ननु किमरविंदे गगनीयत्वविरहो नेत्याह अत्रेति उपदर्शितानुमानरत्यर्थः
पदेति सद्धेत्वभावेतिव्याप्तिवारणाय पदेति घटादि अभाववारणाय हेत्विति सोयं स्वरूपासिद्धः स्वरूपासिद्धभागा
सिद्धविशेषणासिद्धविशेष्यासिद्धभेदेन बहुविधः तत्राद्यस्तूपदर्शितो द्वितीयो यथा उद्भूतरूपादिचतुष्टयगुणः
रूपाभावादिस्वरूपत्वहेतोः पक्षैकदेशावृत्तित्वेन भागासिद्धत्वं तृतीयो यथा वायुः प्रत्यक्षः रूपवत्त्वे सति स्पर्शव
त्वादित्यत्र रूपवत्त्वविशेषणस्य वायावृत्तेस्तद्विशिष्टस्पर्शवत्त्वेपि तथात्वेन तस्य स्वरूपासिद्धत्वं निर्वहति विशेष
अरविंदत्वात् सरोजारविंदवदिति अत्र गगनारविंदमाश्रयः स च नास्त्येव पक्षहेत्वभावः स्वरूपाऽसिद्धो य
था शब्दो गुणः चाक्षुषत्वादिति अत्र चाक्षुषत्वं शब्दे नास्त्येव शब्दस्य श्रावणत्वात् सोपाधिको व्याप्यत्वासिद्धः स
णाभावे विशिष्टस्याप्यभावान्न तु ध्यव्यापकत्वे सति साधनाव्यापक उपाधिः द्वितीयो यथा अत्रैव विशेषणविशेष्यवै
परीत्येन हेतोः तस्य स्वरूपासिद्धत्वं तु विशेष्याऽभावप्रयुक्तविशिष्टाभावादिति बोध्यम् व्याप्यत्वासिद्धं निरूपय
ति सोपाधिक इति ननु कोयमुपाधिरत आह साध्येति साधनाव्यापक उपाधिरित्युक्ते शब्दोऽनित्यः कृतकत्वादित्यत्र
सामान्यवत्त्वे सत्यस्मदादिबाह्येंद्रियग्रहणहेतुत्वमप्युपाधिः स्यात् तदर्थं साध्यव्यापकत्व इत्युक्तं तावन्मात्रोक्ते सामान्यवत्त्वा
दिनाऽनित्यत्वसाधने कृतकत्वमुपाधिः स्यात् तदर्थं साधनाव्यापक इत्युक्तं उपाधिभेदमादाय असंभववारणाय

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

त. सं. १५ संज्ञासंज्ञीति अत्र मित्यादिवारणाय संबंधेति संयोगादिवारणाय संज्ञासंज्ञीति अयं गवयपदवाच्य इति अभि

प्रेतम् गवयो गवयपदवाच्य इत्यर्थः। तेन गवयांतरे शक्तिग्रहाभावप्रसंग इति दूषणमपास्तम् तत्र यत्र गोसादृश्यवि

शिष्टपिंडज्ञानं करणम् अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः। उपमितिः फलमिति तस्मात् तच्चोपमानं त्रिविधं

सादृश्यविशिष्टपिंडज्ञानम् असाधारणधर्मविशिष्टपिंडज्ञानं वैधर्म्यविशिष्टपिंडज्ञानं चेति तत्राद्यमुक्तमेव द्वि

संज्ञासंज्ञिसंबंधज्ञानमुपमितिः तत्करणं सादृश्यज्ञानं तथाहि कश्चिद् गवयशब्दवाच्यमजानन् कुत

श्चिदारण्यकपुरुषात् गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थस्मरन् गोसदृशं पिंडं पश्यति तद

नंतरम् अयं गवयशब्दवाच्य इत्युपमितिरुत्पद्यते इत्युपमानम्॥

तीयं यथा खड्गमृगः कीदृग् इति पृष्टे नासिकालसदेकशृंगो गौरिति गजवत् इति श्रुत्वा ततो भ्रमन् तत्र कालांतरे

ताहृशं पिंडमुपलभ्य अतिदेशवाक्यार्थं स्मरति तदनंतरं खड्गः खड्गपदवाच्य इत्युपमितिरुत्पद्यते अत्र नासिकाल

सदेकशृंगमेवासाधारणधर्मः। तृतीयं यथा उष्ट्रः कीदृग् इति पृष्टे अश्वादिवत् समानपृष्ठो न ह्रस्वग्रीवः शरीरेण

तिग्मश्च कालांतरे तत्पिंडदर्शनात् वैधर्म्यविशिष्टपिंडज्ञानेन ततोऽतिदेशवाक्यार्थस्मरणात् ततः उष्ट्रः पदवा

वाच्य इत्युपमितिरुत्पद्यते इति इति पदकृत्ये उपमानखंडः १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

त्त्वरूपत्वमिति साधनाव्यापकत्वं च वायावुद्भूतरूपविरहात् तृतीयो यथा प्रागभावो विनाशी जन्यत्वादित्यत्र भावत्वमुपाधिः तस्य यत्र विनाशित्वं तत्र भावत्वमिति न केवलं साध्यव्यापकत्वं प्रागभावे भावत्वविरहात् किंतु जन्यत्वरूपसाधनावच्छिन्नविनाशित्वं यत्र तत्र भावत्वमिति साधनावच्छिन्नसाध्यव्यापकत्वमेवास्ति यत्र जन्यत्वं तत्र न भावत्वमिति साधनाऽव्यापकत्वं ध्वंसे भावत्वविरहात् एवं स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वं

यत्र यत्र वह्निस्तत्र तत्रार्द्रेन्धनसंयोगो नास्ति अयोगोलके आर्द्रेन्धनसंयोगाऽभावात् एवं साध्यव्यापकत्वम् इति साधनाऽव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धं यस्य साध्याऽभावः प्रमाणान्तरेण निश्चितः स बाधितः यथा वह्निरनुष्णो द्रव्यत्वादिति अत्राऽनुष्णत्वं साध्यं तदभावः उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम् व्याख्यातमनुमानम् उपमितिकरणमुपमानम् ॥

मुपाधिः श्यामत्वस्य नीलघटेऽपि सत्त्वात् न केवलं साध्यव्यापकत्वं किंतु साधनावच्छिन्नसाध्यव्यापकत्वमेव अस्मिन् पक्षे शाकपाकजन्यत्वविरहेण साधनाव्यापकत्वं चेत्यादिकमपि द्रष्टव्यम् यस्येति सद्धेतुवारणाय प्रमाणान्तरेणेति घटादिवारणाय साध्येति इति पदकृत्ये अनुमानखण्डः अथ अवसरसंगतिमभिप्रेत्यानुमानानन्तरमुपमानं निरूपयति उपमिनोतीति उपमितेः करणमुपमानमित्यर्थः कुठारादिवारणाय मितीति प्रत्यक्षादिवारणाय

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

त॰सं॰ तथा चेति आकांक्षादिकं शाब्दहेतुरित्युक्ते चेत्यर्थः पदेति अन्ताकांक्षामुदाहरणं दर्शयति नन्वेतावता शाब्दसा
मग्रिप्रमाविभाजकवाक्ये शाब्दस्यापुद्दिष्टत्वेन तन्तुतो न प्रदर्शितमित्यत आह वाक्यार्थेति शाब्दमेव शाब्दत
१९ प्रत्येमीत्यनुभवसिद्धजातिः शाब्दबोधः क्रमो यथा चैत्रो ग्राममगच्छतीत्यत्र ग्रामकर्मकगमनानुकूलवर्तमानकृ
तिमानिति शाब्दबोधः द्वितीयायाः कर्मत्वमर्थः धातोर्गमनमनुकूलत्वं च संसर्गमर्यादया भासते लटो वर्त

तथा च आकांक्षादिरहितं वाक्यम् प्रमाणं यथा गौरश्वः पुरुषो हस्तीति न प्रमाणं आकांक्षाविरहात् अ
ग्निना सिंचेदिति न प्रमाणं योग्यताविरहात् प्रहरे प्रहरे असहोच्चारितानि गामानयपुत्रो देवदत्तेनेत्यादिप
दानि न प्रमाणं सन्निध्यभावात् वाक्यं हि द्विविधं वैदिकं लौकिकं च वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमा
णं लौकिकं त्वाप्तोक्तं प्रमाणं अन्यदप्रमाणं वाक्यार्थज्ञानं शाब्दज्ञानं तत्करणं शब्दः इति शब्दप्रमा
णं यथार्थानुभवो निरूपितः

मानत्वमाख्यातस्यकृतिः तत्संबंधः संसर्गमर्यादया भासते रथो गच्छतीत्यत्र गमनानुकूलव्यापारवान् रथ
इति शाब्दबोधः रथो नागच्छतीत्यत्र गमनप्रागभावावच्छिन्नकालीनस्थानकर्ता गमनानुकूलवर्तमानकृतिमानि
ति शाब्दबोधः क्ताप्रत्ययस्य कर्ता पूर्वकालीनत्वं चार्थः एवमन्यत्रापि वाक्यार्थो बोध्यः अथ यथार्थानुभवं विभज ८ १९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

अवसरसंगतिमभिप्रेत्योपमानानंतरं शब्दं निरूपयति आप्तेति शब्द इति शब्दः प्रमाणमित्यर्थः भ्रांतविप्र
लंभकयोर्वाक्यस्य शब्दप्रमाणत्ववारणाय आप्तेति ननु कोयमाप्त इत्यत आह आप्तस्त्विति यथार्थवक्ता यथाभू
तार्थवादितार्थोपदेष्टा घटादिस्मृत्यवारणाय पदेति शक्तमिति निरूपकतासंबंधेन शक्तिविशिष्टमित्यर्थः
अस्मादिति घटपदात् घटरूपोर्थो बोद्धव्य इतीश्वरेच्छैव शक्तिरित्यर्थः अर्थस्मृत्यनुकूलपदपदार्थसंबंधत्वेन ल
क्षणं शक्तिमिव लक्षणामपि पदस्य वृत्तिः अथ केयं लक्षणा शक्यसंबंधो लक्षणा सा च त्रिधा जहत् अजहत् जहदजहद्भे
दात्मिका शब्दः आप्तस्तु यथार्थवक्ता वाक्यं पदसमूहः यथा गामानय शुक्लां दण्डेनेति शक्तं पदमस्मात्प
दादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः आकांक्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः पदस्य पदान्तर
व्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकांक्षा अर्थाबाधो योग्यता पदानामविलंबेनोच्चारणं सन्निधिः ॥
दात् वर्तते वर्णगंगायां घोष इत्यत्र गंगापदस्य शक्यप्रवाहसंबंधस्तीरे लक्षणाबीजं च तात्पर्यानुपपत्तिः अत एव
प्रवाहे घोषतात्पर्यानुपपत्तिस्तीरे लक्षणेत्यपास्तमिति छत्रिणो यान्तीत्यादौ द्वितीया सोयमश्व इत्यादौ तृतीया पदस्ये
ति असंभववारणाय पदांतरव्यतिरेकप्रयुक्तेति पुनरसंभववारणाय पदांतरेति अर्थेति आकांक्षावारणाय अर्थे
ति पदानामिति असहोच्चारितेष्वतिव्याप्तिवारणाय अविलंबेनेति आकांक्षावारणाय पदानामिति आकांक्षा
दिशून्यवाक्यस्याप्रमाणत्वं निषेधयति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

त.सं.
१८

र्यात्मकत्वेन पृथग्विभागोऽनुचितः। तथापि प्रमाणानुग्राहकत्वात्तदुचितमिति बोध्यं एवमप्युक्तरीत्यूह
ह्यं दृष्टान्तदेशायोः संयोगविभागानामात्मनस्त्रिस्थितेरदृष्टविशेषेण वाजन्यत्वेन सत्त्वमानसविपर्ययेतर्क्ष्मनः
स्वरूपं निरूपयति सर्वेषामिति सर्वेषामात्मनामनुकूलमिति वेद्यं यत्तत्सुखमित्यर्थः। अहं सुखीत्यनुभव
सिद्धसुखत्वजातिमद्धर्ममात्रासाधारणकारणगुणो वा सुखं शत्रुदुःखवारणाय सर्वेषामिति प्रतिकू

सर्वेषामनुकूलवेदनीयं सुखं प्रतिकूलवेदनीयं दुःखं इच्छा कामः क्रोधो द्वेषः

लेति दुःखत्वजातिमदधर्ममात्रासाधारणकारणगुणो वा दुःखं पदकृत्यं पूर्ववत् इच्छां निरूपयति इच्छे
ति काम इति पर्यायः। इच्छात्वजातिमतीच्छा सा द्विधा फलेच्छा उपायेच्छा च फलं सुखादिकमुपायो यागादिः।
द्वेषं निरूपयति क्रोध इति द्वेष्मीत्यनुभवसिद्धद्वेषत्वजातिमान्द्विष्टसाधनताज्ञानजन्यगुणो वा द्वेषः प्रय १८
त्नं निरूपयति

=

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

अयथार्थेति । संशयं लक्षयति एकस्मिन्निति एकस्मिन्धर्मिणि एकस्मिन्नेव पुरोवर्तिनि पदार्थे विरुद्धा व्याघातकारिणा ये नानाधर्माः स्थाणुत्वपुरुषत्वादयस्तेषां वैशिष्ट्यं संबंधः तदवगाहि ज्ञानं संशय इत्यर्थः घटपटाविति
समूहालंबनज्ञानस्य घटत्वपटत्वरूपविरुद्धनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसक्तिवारणाय एकस्मिन्निति
घटः पृथिवीति ज्ञानस्यैकस्मिन्धर्मिणि घटे घटत्वपृथिवीत्वरूपनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसं

अयथार्थानुभवस्त्रिविधः संशयविपर्ययतर्कभेदात् एकस्मिन्धर्मिणि विरुद्धनानाधर्मवै
शिष्ट्यावगाहि ज्ञानं संशयः यथा स्थाणुर्वा पुरुषो वेति मिथ्याज्ञानं विपर्ययः यथा शुक्ता
विदं रजतमिति व्याप्यारोपेण व्यापकारोपस्तर्कः यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्या
दिति स्मृतिरपि द्विविधा यथार्था अयथार्था च प्रमाजन्या यथार्था अप्रमाजन्याऽयथार्था

गवारणाय विरुद्धेति पटविरुद्धघटत्ववान् घट इति ज्ञानेऽतिप्रसक्तिवारणाय नानेति मिथ्येति यथार्थ
ज्ञानवारणाय मिथ्येति मिथ्यार्थवारणाय ज्ञानेति तर्कं लक्षयति व्याप्येति असंभववारणाय व्याप्यारोपे
ति पुनरसंभववारणाय व्यापकारोप इति अत्र वह्न्यभावो व्याप्यः धूमाभावो व्यापकः यद्यपि तर्कस्य विप ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

अनुभवेति आत्मादिवारणाय प्रथमदलम् अनुभवध्वंसवारणाय द्वितीयदलं स्थितिस्थापकमाह अन्यथे
त.सं. ति पृथिवीमात्रसमवेतसमवेतसंस्कारत्वव्याप्यजातिमत्त्वं स्थितिस्थापकत्वं गंधत्वमादाय गंधेतिव्याप्तिवारणाय
१८ संस्कारत्वव्याप्येति भावनात्वमादाय भावनावारणाय पृथिवीसमवेतसमवेतेति गुणेति द्रव्यकर्मभिन्नत्वे सति सा
मान्यवान् गुणः द्रव्यकर्मणोरतिव्याप्तिवारणाय विशेषणदलं सामान्यादावतिव्याप्तिवारणाय विशेष्यदलं चलने

अनुभवजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः अन्यथाकृतस्य पुनस्तदवस्थापकः स्थितिस्थापकः क
टादिपृथिवीमात्रवृत्तिः इति गुणाः चलनात्मकं कर्म ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम् अधोदेशसंयोग
हेतुरपक्षेपणं शरीरसन्निकृष्टसंयोगहेतुराकुंचनम्

तिसंयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्मेहत्वकसंयोगवारणाय सत्यंतं वेगादिवारणाय विशेष्यदलं ऊ
र्ध्वेति अपक्षेपणवारणाय ऊर्ध्वेति कालादिवारणायासाधारणेत्यपि बोध्यं अधोदेशेति उत्क्षेपणवारणायाधोदे
शेति कालादिवारणायासाधारणेत्यपि देयं शरीरेति प्रसारणादिवारणाय शरीरसन्निकृष्टेति कालादिवार
णायासाधारणं देयम् १८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

ष्टेति रिति प्रयत्नत्वजातिमान् प्रयत्नः स त्रिविधः प्रवृत्तिनिवृत्तिजीवनयोनिभेदात् इच्छाजन्यो गुणः प्रवृत्तिः द्वे
षजन्यो गुणो निवृत्तिः जीवनादृष्टजन्यो गुणो जीवनयोनिः स च प्राणसंचारकारणं धर्ममाह विहितेति वेदविहित
त्वर्थः अधर्मवारणाय वेदविहितेति यागादिक्रियावारणाय कर्मजन्य इति स च कर्मनाशाजलस्पर्शकीर्तन
भोगतत्त्वज्ञानादिना नश्यति अथ धर्मलक्षणमाह निषिद्धेति वेदेनेत्यर्थः धर्मवारणाय वेदनिषिद्धेति निषिद्ध
क्रियाः प्रयत्नाः विहितकर्मजन्यो धर्मः निषिद्धकर्मजन्यस्त्वधर्मः बुद्ध्यादयोऽष्टावात्ममात्रगुणाः बुद्धी
च्छाप्रयत्ना नित्या अनित्याश्च नित्या ईश्वरस्य अनित्या जीवस्य संस्कारस्त्रिविधः वेगो भावना स्थितिस्थापक
श्चेति वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः ॥ क्रियावारणाय कर्मजन्य इति स च भोगप्रायश्चित्तादिना न
श्यति एतावेवादृष्टावित्युच्येते वासनाजन्यो च वासनाचविलक्षणः संस्कारः संस्कारं विभजते संस्कारेति सा
मान्यगुणात्मविशेषगुणोभयवृत्ति गुणत्वव्याप्यजातिमान् संस्कारः चेष्टादिवारणाय गुणत्वव्याप्येति संयोगा
दिवारणाय आत्मविशेषगुणोभयवृत्तीति ज्ञानादिवारणाय सामान्यगुणेति द्वितीयादियतनात् समवायिकार
णो वेगः रूपादिवारणाय द्वितीयादियतनेति कालादिवारणाय समवायीति भावनां लक्षयति ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

न.सं. १५

सादिरिति घटादिवारणायानंतइति आत्मादिवारणाय सादिरिति उत्पत्तीति कार्यस्येत्यस्यानंतरं स्वप्रतियोगि
समवायिकारणवृत्तिरित्यर्थः स च ध्वंसत्वइति प्रत्यक्षविषयः अत्यंताभावं लक्षयति त्रैकालिकेति त्रैकालिकत्वे
सति संसर्गावच्छिन्नप्रतियोगिताकोऽत्यंताभावः ध्वंसप्रागभाववारणाय त्रैकालिकेति भेदवारणाय संसर्गेत्या
दि घटवति भूतले घटाभावस्य सत्त्वेपि सामग्र्यभावान्न प्रतीत्यभावः सा च सामग्री भूतलघटसंयोगप्रागभाव

सादिरनंतः प्रध्वंसाभावः उत्पत्त्यनंतरं कार्यस्य त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यंताभावः
यथा भूतले घटो नास्तीति तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः यथा घटः पटो

प्रध्वंसाद्यभावत्तादृशप्रतीतिकालीनभूतलादिकमिति वा अन्योन्याभावं लक्षयति ॥ न भवतीति ॥
तितादात्म्येति प्रागभाववारणाय तादात्म्येति अत्यंताभाववारणाय तादात्म्यत्वेन तादात्म्यसंबंधो विशेषणीयः
पदार्थज्ञानस्य परमप्रयोजनं मोक्षइत्याह मनेति आत्यंतिकेति विंशतिदुःखध्वंसः आत्यंतिकत्वं च स्वसमानाधिक
रणदुःखप्रागभावासमानकालीनत्वं दुःखध्वंसस्येदानीमपि सत्त्वेन अस्मदादीनामपि मुक्तत्वापत्तिवारणाय
कालीनांतं तन्मुक्तात्मकदुःखध्वंसस्यान्यदीयदुःखप्रागभावसमानकालीनत्वाद्वामदेवादीनां मुक्तात्मनामपि
अमुक्तत्वप्रसंगात्स्वसमानाधिकरणेति १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

विप्रकृष्टेति उत्क्षेपणादिवारणाय विप्रकृष्टेति कालादिवारणाय साधारणमप्यावश्यकं नित्यमिति
संयोगादिवारणाय नित्यमिति कालादिपरिमाणवारणाय अनेकेति अनेकानुगतत्वं च समवाये न वोध्यमेतेन
नास्तिताभावे इति व्याप्तिः नित्यद्रव्यवृत्तय इति घटत्वादिवारणाय नित्यद्रव्यवृत्तय इति आत्मत्वमनस्त्ववारणाय

विप्रकृष्टसंयोगहेतुः प्रसारणं अन्यत्सर्वं गमनं नित्यमेकमनेकानुगतं सामान्यं द्रव्यगुणकर्म
वृत्ति परं सत्ता अपरं जातिर्द्रव्यत्वादि नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः नित्यः संबंधः समवायः अ
युतसिद्धवृत्तिः ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ अवयवावय
विनौ गुणगुणिनौ क्रियाक्रियावंतौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति अनादिः सान्तः प्रागभावः उत्पत्तेः पू
र्वं कार्यस्य

आत्मत्वमनस्त्वभिन्नत्वस्यापि वोध्यं नित्य इति आकाशादिवारणाय संबंध इति संयोगवारणा
य नित्य इति स्वरूपसंबंधवारणाय तद्भिन्नत्वस्यापि वोध्यं प्रागभावं लक्षयति अनादिरिति घटादिवारणाय प्र
थमदलं परमाणुवारणाय द्वितीयदलं पुनः प्रागभावः कस्मिन्काले तिष्ठतीत्यत आह उत्पत्तेरिति कार्यस्योत्पत्तेः
प्राक् स्वप्रतियोगिसमवायिकारणे वर्तत इत्यर्थः ध्वंसं लक्षयति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

प्रागभावविशेषणंदुःखानिचैकविंशतिशरीरंषडिंद्रियाणिषड्विषयाःषड्बुद्धयःसुखंदुःखंचेतिदुःखानुषं
तसं गित्वाच्छरीरादेर्गौणंदुःखत्वंतत्त्वाचात्मावाअरेद्रष्टव्यःश्रोतव्योमन्तव्योनिदिध्यासितव्यइतिश्रुतेरात्मज्ञान
२० साधनंनिदिध्यासनंमननंसाधनंत्वंपदार्थज्ञानेसत्ताचटीतिएवंचसतितत्त्वज्ञानेशरीरपुत्रादावात्मस्वीयत्वा
भिमानरूपमिथ्याज्ञानस्यनाशःतेनदोषाभावस्तेनप्रवृत्त्यनुत्पत्तिस्ततस्तत्कालीनशरीरेणकायव्यूहेनवाभो
गतत्त्वज्ञानाभ्यांप्रारब्धकर्मणांनाशस्ततोजन्माभावः नित्यनैमित्तिकैरेवकुर्वाणोदुरितक्षयंज्ञानंचविमलीकु

सर्वेषांपदार्थानांयथायथोक्तेष्वन्तर्भावात्सप्तैवपदार्थाइतिसिद्धम् कणादन्यायमतयोर्बालव्युत्प
त्तिसिद्धयेअन्नंभट्टेनविदुषारचितस्तर्कसंग्रहः इतिश्रीतर्कसंग्रहः समाप्तम् ॥

र्वेभ्यासेनचयाचयाचयेत् अभ्यासात्पक्वविज्ञानःकैवल्यंलभतेनरइत्यादिवचनात् तमेववित्वातिमृत्यु
मेतीतिश्रुतेश्चसगुणोपासनाकाशीमरणादिरपितत्त्वज्ञानद्वारामुक्तिहेतुरतएवपरमेश्वरःकाश्यांतारक
मुपदिशतीति सारंचक्रेचंद्रजसिंहोहिपदकृत्यमिदंशुभंपरोपकारकरणसाधवोवीक्षतामिदम् इतिश्री २०
मदत्तभवद्भुहदत्तसिंहशिष्यश्रीचंद्रजसिंहविरचितकर्कसंग्रहदीपिकापदकृतकेचतुर्थःखंडः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

~~134~~ 134

134

Sanskrit
181.4
T187

(134-MS.)

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative